श्री ललितांबा परमेश्वर स्तवः

श्री ललितांबा परमेश्वर स्तवः

कलयतु कल्याणततिं
कमलासखपद्मयोनिमुखवंद्यः |
करिमुखषण्मुखयुक्तः
कामेशस्त्रिपुरसुंदरीनाथः || 1 ||

एकैवाहं जगती-
-त्यायोधनमध्य अब्रवीद्यादौ |
शुंभं प्रति सा पाया-
-दाद्या शक्तिः कृपापयोराशिः || 2 ||

ईषदिति मन्यते य-
-त्पदभक्तः शंभुविष्णुमुखपदवीः |
सा मे निश्चलविरतिं
दद्याद्विषयेषु विष इवात्यंतं || 3 ||

लभते परात्मविद्यां
सुदृढामेवाशु यत्पदासक्तः |
तां नौमि बोधरूपा-
-माद्यां विद्यां शिवाजमुखसेव्यां || 4 ||

ह्रीमान्भवेत्सुरेश-
-स्तद्गुरुरपि यत्पदाब्जभक्तस्य |
लक्ष्मीं गिरं च दृष्ट्वा
सा मामव्यात्तयोः प्रदानेन || 5 ||

हसति विधुं हासेन
प्रवालमपि पंचशाखमार्दवतः |
अधरेण बिंबमव्या-
-त्सा मा सोमार्धमूर्धपुण्यततिः || 6 ||

सकलाम्नायशिरोभि-
-स्तात्पर्येणैव गीयते रूपं |
यस्याः सावतु सततं
गंगाधरपूर्वपुण्यपरिपाठी || 7 ||

कलिमलनिवारणव्रत-
-कृतदीक्षः कालसर्वगर्वहरः |
करणवशीकरणपटु-
-प्राभवदः पातु पार्वतीनाथः || 8 ||

हरतु तमो हार्दं मे
हालाहलराजमानगलदेशः |
हंसमनुप्रतिपाद्यः
परहंसाराध्यपादपाथोजः || 9 ||

ललनाः सुरेश्वराणां
यत्पादपाथोजमर्चयंति मुदा |
सा मे मनसि विहारं
रचयतु राकेंदुगर्वहरवदना || 10 ||

ह्रीमंतः कलयति यो
मूलं मूलं समस्तलक्ष्मीनां |
तं चक्रवर्तिनोऽपि
प्रणमंति च यांति तस्य भृत्यत्वं ||

सदनं प्रभवति वाचां
यन्मूर्तिध्यानतो हि मूकोऽपि |
सरसां सालंकारां
सा मे वाचं ददातु शिवमहिषी || 12 ||

करकलितपाशसृणिशर-
-शरासनः कामधुक्प्रणम्राणां |
कामेश्वरीहृदंबुज-
-भानुः पायाद्युवा कोऽपि || 13 ||

लब्ध्वा स्वयं पुमर्थां-
-श्चतुरः किंचात्मभक्तवर्येभ्यः |
दद्याद्यत्पदभक्तः
सा मयि करुणां करोतु कामेशी || 14 ||

ह्रींकारजपपराणां
जीवन्मुक्तिं च भुक्तिं च |
या प्रददात्यचिरात्तां
नौमि श्रीचक्रराजकृतवसतिं || 15 ||

श्रीमातृपदपयोजा-
-सक्तस्वांतेन केनचिद्यतिना |
रचिता स्तुतिरियमवनौ
पठतां भक्त्या ददाति शुभपंक्तिं || 16 ||

इति शृंगेरि श्रीजगद्गुरु श्रीसच्चिदानंदशिवाभिनवनृसिंहभारतीस्वामिभिः विरचितः श्री ललितांबा परमेश्वर स्तवः |